चार्यप्रभृति मुनिमतल्लिकानाम् सर्वदैव प्रपाठ्य इत्यवधार्य चेतसि निखिलाना पठ्यसौक- र्यार्थमस्मद्गुरुपूज्यपादानुयोगाचार्य (प) श्रीमन् **मोहनविजय** गणिभि स्संशोधनकृते-

—प्रत्यन्तरकोटावालब्ध्यर्थं निर्यतितेपिप्र- यत्नेष्वतोऽप्यायासे ( केवल १ स्वर्गीयशासङ्गृ हीत, २ स्वर्गतमुनिवर्यश्रीमत्तिविजयसत्क क्षेतिनाल्पशुद्धेनापि पुस्तकद्वयेन )—श्रीमद्वा- चकपुङ्गवचातुर्यचमत्कृतिचयाचितेऽस्मिन्प्रबन्धे रसिकतयैषा सान्दिग्धकतिपयपद्यान्यपि बहु परिश्रमेण सम्यक्त्य संशोधित अत एव सर्वेषामध्ययनाध्यापनार्हं पद्य-श्रीमद् मुक्ति कमलजैन मोहनमालाया **नवमपुष्प** रूपेण दृग्गोचरीक्रियते

मुफ ( मुद्रणपत्र ) सुधारणादिकार्ये कृते ष्यायासे स्वाभाविक्या छद्मस्थस्खलनया वा क्वचनाशुद्धिश्चेत्संशोधयन्तु ।

| | | |
|---|---|---|
| वीर निर्वाणतिथौ दीपावल्याम् १ २४४६ | वडोदरा कोठी पोळ | इति विज्ञापयति **प्रतापविजय** |

ॐ

श्री जिनाय नम

श्रीमद् यशोविजय वाचक
विरचिता

# मार्ग परिशुद्धिः

---

ऐन्द्रश्रेणिनताय
प्रथमाननयप्रमाणरूपाय ।
भूतार्थभासनाय
त्रिजगद्गुरुशासनाय नम ॥ १ ॥

जयति सता किमपि मुखे
जिनवचनामृतनिषेकमाधुर्यम् ।
उद्गीरति गुणगरिमा
कर्णौ यत वाग्गिरा पिहित ॥ २ ॥

स्याद्वादास्वादपरा
मतिर्यान्ति हि परमतानि निरसानि ।
नहि माकन्दमुकुलभुग्
नन्दति पिचुमन्दतरुषु पिकः ॥ ३ ॥

वस्तुविनिश्चयपटुना
स्याद्वादेनैव देशना देया ।
इत्युत्सर्गस्थितिरिय-
मपरा त्वपवादमर्यादा ॥ ४ ॥

---

१ पिहित इत्यपि । २ आगन्ति ।

अत एव दिदेश तथा
कथासु धीरो यथार्थकथनपटुः ।
एकद्वित्वादिविधौ
भगवानपि सोमिलप्रश्ने ॥ ५ ॥

उत्सर्गानिश्चयतो
वाचामाचारचातुरीनियतम् ।
तदनेकनयमयत्वे
युक्तमितरथा तु न कथञ्चित् ॥ ६ ॥

तत्त्वाङ्ग व्यवहारा–
दयमपि येन प्रमाणतो भजते ।
अंशधिया तु नयत्व–
व्यपदेशस्तत्र तज्ज्ञविदाम् ॥ ७ ॥

कुमततमोपहतदृशो
जगतो भूतार्थबोधविमुखस्य ।
आदौ दर्शयति गुरु-
र्निश्चयमाविर्दीपिकामथवा ॥ ८ ॥

---

निश्चयतो निश्चयभाग्
मत्त इव भिनत्ति यश्चरणमुद्राम् ।
तस्य पदे व्यवहारो
वज्रमयी शृङ्खला क्षेप्या ॥ ९ ॥

---

अव्यवहारिणि जीवे
निश्चयनयविषयसाधनं नास्ति ।
ऊषरदेशे बीजमपि
न भवति खलु शस्यनिष्पत्तिः ॥ १० ॥

व्यवहारप्रतिभासो
दुर्नयकुद्दालिकस्य भवबीजम् ।
व्यवहाराचरणं पुन-
रनभिनिविष्टस्य शिवबीजम् ॥ ११ ॥

गुरुपरतन्त्रस्यातो
मार्गानुपाते प्रथमसंसिद्धिः ।
स्फटिक इव पुरस्तात्
तत्र प्रतिफलति गुरुबोधः ॥ १२ ॥

व्यवहारवतस्तनुरपि
बोधः सितपक्षचन्द्र इव वृद्धिम् ।
इतरस्य याति हानिं
पृथुरपि शितिपक्षचन्द्र इव ॥ १३ ॥

१ कृष्णपक्ष ।

अवगतसमयोपनिषद्-
गुरुकुलवास सतां सदा सेव्य ।
आचाराणां निगदित-
मात्र व्यवहारबीजमिदम् ॥ १४ ॥

अस्मादेव हि चरण
सिद्ध्यति मार्गानुसारिभावेन ।
गुरुकुलवासत्यागे
नेयम् भणिता कृतघ्नस्य ॥ १५ ॥

सामान्यधर्मत खलु
क्रमशभावाद्विशिष्यते चरणम् ।
सामान्यविराधिनि पुन-
र्नविशेषस्य स्थितिर्दृष्टा ॥ १६ ॥

२ न इयम् मार्गानुसारिता ।

तस्माद् गुरुकुलवास
शयणीयश्चरणधननिशुद्धिकृते ।
गुरुरपि गुणवानेव
श्लाघ्यत्वमुपैति विमलधियाम् ॥१७॥

प्रव्रज्यार्हगुणविधि-
प्रव्रजितो गुरुकुलाश्रितो नित्यम् ।
अक्षतशील शान्त
सत्त्वज्ञोऽवगतसूत्रार्थ ॥ १८ ॥

प्रवचनवात्सल्ययुतः
सत्वहितरतोऽनुवर्तको धीर' ।
गुर्वनुमतपदानिष्ठो
धर्मकथाकृज्जनादेयः ॥ १९ ॥

अपि.नौ परलोके
स्पिरहस्तावरणोपशमलब्धि ॥
दलितोपान्नगुणे -
ऐपा द्विगुण जिह्नोऽसि गुरु ॥२०॥

---

मत्र उग यो विनयान्
ाणां ग्राहयति पन्नगनुष्टये ।
स गुरुर्गुणपाणिनभवि ,
पर मतीव प्रवचनस्य ॥ २१ ॥

---

अपनगार्येश
ज निष्कुलविशुद्धमस्तकर्माणम् ।
रज्ञनरूपागहाम
रत्नशयविरुद्धरापकरम् ॥ २२ ॥

मरणनिमित्तं जन्म
श्रीश्चपला दुर्लभं च मनुजत्वम् ।
न परनिमित्तं निजसुख-
मिति चिन्तोत्पन्नवैराग्यम् ॥ २३ ॥

---

कालपरिहाणिदोषा-
न्निर्दिष्टैकादिगुणविहीनमपि ।
बहुगुणयुतमाचार्या
दीक्षायोग्यं जनं ब्रुवते ॥ २४ ॥

---

नानीदृशस्य हृदये
रमते जिनगीर्भेवाभिनन्दितया॥
कुङ्कुमरागो वाससि
मलिने न कदापि परिणमते ॥ २५ ॥

गुणवानिप हि शिष्यो
मोहादविनयी गुरोर्भवति ।
दुग्धमपि सर्पमुखगं
विषतामायाति नियतमेव ॥ २६ ॥

---

धनलाभादिप्रपञ्च
साधनतत्परोऽसि सदा ।
पुरतारम्भमुनिभावे
भजना श्रवणस्वात्मविमर्शनात् ॥२७॥

---

श्रुत्वा न प्रतपोऽयं
[illegible]भावनं
[illegible]

तदपेशल यत खलु
धाल्य नो चरणभावपरिपन्थि ।
कर्मक्षयोपशमज
सहितस्तदशान्तराधीन ॥ २९ ॥

नियमस्त्वतिबालाना
परिभवनीयत्वभावगान्याभ्याम् ।
बाला इव चेष्टन्ते
केचन गतयौवना अपि तु ॥ ३० ॥

अविवेकद्वारा खलु
यौवनमपकारि तत्त्वतस्तत् स. ।
तदभावस्तद्विगमः
स तु न जिनैर्वारितः क्वापि ॥३ ॥

गुरुय च भुक्तभोगे-
प्वपि भुवि सम्भावनीयदोषत्वम् ।
प्रत्युत तेष्वधिकफल
फाशाना तदभक्ताभ्यास ॥ ३२ ॥

समाणिमादिसक्षात्
पुत्रापानिवृत्तिसादरादारात् ।
रम्भानामविश्वाख्य
फलदोषो न सम्भाव्य ॥ ३३ ॥

नैतत्मास्ति भावो
दीक्षानिकलेति मन्ददोषेषु ।
अन्दे न्याश्रयगाङ्कुर
गुरु नियम विना नगप । ३४ ॥

१ दर्भे न म ... धम् ।

अपि चान्तरालविघ्ना-
शङ्कि प्रागेव तन्निवृत्त्यर्थम् ।
श्रुतमभ्यस्यन्नाधिक
कृतकृत्यो भवति बालयतिः ॥२५॥

न पुमर्थक्रमसेवा
स्वेतद्विपयव्यतिक्रमनिमित्तम् ।
यद्धर्म एव सुखद'
प्रतिपक्षावर्थकामौ तु ॥ २६ ॥

ब्रुवतेऽन्ये प्राधान्य
मन्दमहा गृहाश्रमस्यैव ।
उपजीवन्ति यदेन
सर्वेऽप्यन्नादिनाश्रमिणः ॥ २७ ॥

तदसदुपजीवनात
प्राधान्य येन लाङ्गलादे स्यात् ।
ज्ञानादिकृत त्वेतद्
व्रतिनि इह नो गृहाश्रमिणि ॥३८॥

अन्येस्त्वत्र जनस्य
स्वजनविरहितस्य योग्यता ब्रुवते ।
तद्विलपनादि पाप
त्यागे खलु पालनीयस्य ॥ ३९ ॥

तदसदिहापि हि पाप
प्राणवधाद्यत्सपालनेऽभ्याधिक ।
आरम्भत सतत्त्वे
स्वपरविभागश्च नावगते ॥ ४०* ॥

* सा इन्द्र गाथायम् ।

सत्त्वौघप्रव्रजतो-
रारम्भत्यागस्पृष्टतौल्यम् ।
अभ्युपगमवादोऽप
न विधित्यागेऽल्पदोषोऽपि ॥ ४१ ॥

अन्ये त्वाहु सुखिना
प्रव्रज्या फलवती न चान्येषाम्
नात्यक्तभोगविभवाः
पात्र गम्भीरभावस्य ॥ ४२ ॥

अधिकतरं प्रव्रज्या
पर्याय प्राप्य ते हि मान्ये।
क्षुद्रप्रव्रज्यातो
लोके धर्मोपघातोऽपि

एतदपि मुग्धरिस्पय-
यर न युक्तिक्षम तु मतमुचै ।
अविवरूपरित्यागात्
त्यागियनिश्चयनयस्य ॥ ४४ ॥

अविवेकरूपरित्यागात्
पालयति मुनिक्रियां स भावेन ।
सन्नाभेदात् त्यक्त-
ग्रहण ह्यविवेकशाक्तिकृनम् ॥ ४५ ॥

ध्वानिभेदेऽपि सपाप
मकृतर्नेहित हि मधुरकादीव ।
सापेक्षस्य यतनया
तदनुमतिर्नैव विहितार्थे ॥ ४६ ॥

गुणधर्मानुपघातो
निःस्वस्याप्यपगतातिरेकस्य ।
स्तुवन्तु व्यवहारात्
युक्तो हुस्तत्र वाप्यर्थः ॥ ४७ ॥

---

प्रतिबन्धत्यागपरो
बाह्यत्या गेऽपि गेन युक्तमत्रः ।
जिनधर्माश्रितिधारण-
मुभयत्यागी तु धन्यतरः ॥ ४८ ॥

---

इक्षुवने जिनभवने
समवसृतौ ‹९
गम्भीरसानुनादे
५ रूपे क्षेत्रे ॥

शून्ये गृहऽमनोज्ञे
न तु भग्ने ध्यामिते श्मशाने वा ।
क्षाराङ्गारावकरा-
मे ध्यादिद्रव्यदुष्टे वा ॥ ५० ॥

षष्ठ्यां च चतुर्दश्या
द्वादश्यामष्टमीनवम्योश्च ।
भेषु चतुर्थ्यां सन्ध्या-
गत्यादिषु पञ्चदश्या च ॥ ५१ ॥

तिसृषूत्तरासु कुर्याद्
रोहिण्यामपि च शिष्यनिष्क्रमणम् ।
आरोपण व्रतानां
गणिवाचकयोरनुज्ञा च ॥ ५२ ॥

धर्मकथाक्षिप्त खलु
पृच्छेत् क कुत्र किं निमित्तमिति ।
कुलपुत्रादिप्राप्तो
भजना शेषेषु सूत्रविधेः ॥ ५३ ॥

कथयेदिह दीक्षाया-
स्त मति कापुरुषदूरनुचरतां च ।
आरम्भनिवृत्तानां
लोकद्वयसुखसमृद्धिं च ॥ ५४ ॥

आषण्मासीमुच्चै-
रभ्युपगतमपि पुन परीक्षेत ।
परिणामकमचिरादपि
दद्यादालापक सुदिने ॥ ५५॥

संसर्जनादिदोषा
विधिपरिभोगेन सन्ति देह इव।
इत्थमपीहानास्था
दिक्पटनटनाटक विषमम् ॥ ६२ ॥

---

इच्छाकारेणास्मान्
मुण्डयतेत्यथ स भणति वन्दित्वा।
'इच्छामि' इति भणित्वा
त्रिमपठनपञ्चमङ्गलकम् ॥ ६३ ॥

---

अट्टोस्सिस्रोऽच्छिन्ना
गृह्णाति गुरुस्तत स भणतीदम्।
मम सामायिकमिच्छा-
कारेणारोपयत यूयम् ॥ ६४ ॥

---

१ प्रथमजिषो स्ताकच्छेदमङ्गणम् इत्यथ।

इच्छाम इति भणित्वा
सार्द्धं शिष्येण सूत्रमाकृष्य ।
कुरुते कायोत्सर्गं
गुरुस्तदारोपणनिमित्तम् ॥ ६५ ॥

उत्सार्य नमस्कारो-
च्चारेणैतेन सह गुरु सूत्रम्
पठति त्रिरथ शिष्योऽ-
प्यनुपठति विशुद्धपरिणामम् ॥ ६६ ॥

वासानभिमन्त्र्य गुरु-
स्ततश्च जिनसाधुपादयोर्दत्ते ।
दापयति तत' शिष्य
वन्दनक भणति वन्दित्ता ॥ ६७ ॥

संसर्जनादिदोषा
विधिपरिभोगेन सन्ति देह इव।
इत्यमपीशानास्या
दिक्पटनटनाटक विषयम् ॥ ६२ ॥

इच्छाकारेणास्मान्
गुरुरयतेत्यथ स भणति वन्दित्वा।
'इच्छामि' इति भणित्वा
त्रिमपठनपञ्चमङ्गलकम् ॥ ६३ ॥

अष्टोस्सितोऽप्यच्छिन्ना
गृण्हाति गुरुस्तत स भणतीदम्।
मम सामायिकमिच्छा-
कारेणारोपयत यूयम् ॥ ६४ ॥

१ प्रथम अथो स्ताकेकदशमरणम् इत्यथ ।

इच्छाम इति भणितया
सार्द्धं शिष्येण सूत्रमाकृष्य ।
कुरुते कायोत्सर्गं
गुरुस्तदारोपणनिमित्तम् ॥ ६५ ॥

उत्सार्य नमस्कारो-
च्चारणेतेन सह गुरुः सूत्रम्
पठति त्रिरथ शिष्योऽ-
प्यनुपठति विशुद्धपरिणामम् ॥ ६६ ॥

वासानभिमन्त्र्य गुरु-
स्ततश्च जिनसाधुपादयोर्दत्ते ।
दापयति तत शिष्य
वन्दनक भणति वन्दित्वा ॥ ६७ ॥

सन्दिशत किं भणामी
त्येव प्रवेदय गुरुश्च वन्दित्वा।
इति भणति तताद्धोऽऽ
नवतु स भणतीदमुपयुक्त. ॥६८॥

युष्माभि सामायिक
मारोपितक्रमनुशास्तिमिच्छाम ।
शीर्षे शिष्यस्यैव
गुरुराह ददचतो वासान् ॥ ६९ ॥

वर्द्धस्व गुरुगुणैस्त्व
निस्तारकपारग प्रवेदित किम्।
तुभ्य प्रवेदयामि
स भणाति च सन्दिशत साधूनाम॥७०॥

अन्ये तु जिनादीना
वासान् ददतीह भणति वन्दित्वा ।
सूरि प्रवेदयेति
प्रदक्षिणां शिष्यक कुरुते ॥ ७१ ॥

स नमस्कारोच्चारं
वासानथ सूरिसाधवो ददति ।
कार्यः त्रिवारमेव
पुनरप्युत्सर्गमेके तु ॥ ७२ ॥

आचामाम्लं नियम
व(च)रन्ति किल सश्रिता निजावलि-
काम् ।
निपतन्ति शिष्य पदयो
ततश्च जिनसाधुसूरीणाम् ॥ ७३ ॥

वन्दने च तपन्ये
गुरवप्युपदिशति धर्मसर्वस्वम् ।
शीलमोक्षनिदाने
माभे कार्य प्रमादो गो । ७४ ॥

---

व्यभिचाराद् क्रियेन
क्रियाकलापेन परमपदसिद्धौ ।
विरतौ सत्यां विफल-
स्तदसत्त्वेय मृषा भूमि ॥ ७५ ॥

---

नैव विरस्तुपाय
भार्या यदप जिनोक्तलिङ्गविधि ।
इत्थ क्रिया परिणता
पर्याय पाळयन्ति बुधा ॥ ७६ ॥

निरते सत्येऽप्येतच्च
वृथाज्ञासङ्गतं क्रियान्तरवत् ।
विधिकारयितुः शुद्धाद्
भावादगुणो न तदभावे ॥ ७७ ॥

---

विषये युक्तोऽपि गुरो-
र्विनिना मन्त्राजने गुणो भावात्
तदभावे परमाना-
ज्ञातादिह तीर्थविच्छित्तिः ॥ ७८ ॥

---

न च गुरुवासत्याग
पापात् सङ्क्लेशलिङ्गक यत्तत् ।
स च तत्र हन्त विपुल-
स्तदभावेनाप्यसङ्गस्य ॥

गेहादौ सत्येप
प्रसरति पापानुबन्धिनः पुण्यात् ।
सत्पापमेव पुण्या-
नुबन्धि तस्यागिनां योगे ॥ ८० ॥

धर्मध्याननिमित्त
परिशुद्ध तद्विरक्तसुखहेतु ।
पुण्याशुभपरिणामा-
नपायिनी वेदनाऽप्यत्र ॥ ८१ ॥

येन क्षुदादय खलु
कर्मक्षयकारणानि भावयते ।
ज्वरिणामिह बाधन्ते
कटुकौषधपानमिव न मन ॥ ८२॥

नैकान्तोऽप्यत्र तपो
नियमविधेर्व्यसनिरपि च क्षान्तानाम् ।
आत्मैवान्नादिविधौ
न च लोभ इतीह को दोष ॥ ८३ ॥

शीतोदकाद्यभोगोऽ
प्यत्र न दानान्तरायकारणकं ।
किन्तु विपाकपटुकतां
मत्वा सद्धर्मेन युक्तम् ॥ ८४ ॥

चारित्रविहीनाना–
मज्ञानवतां तु येदृशी चेष्टा ।
अभिपङ्करूपराणां
सा प्रतिषिद्धा जिनवरेन्द्रैः ॥ ८५ ॥

आविधिपरिपालनादे-
र्यैर्मुषित प्राणिना तु धर्मधनम् ।
पापानुबन्धिपापात्
भाले तेषामसद्दीक्षा ॥ ८६ ॥

सद्ध्यानादेर्विरहे
गृहवासस्ततोऽन्यथा दीक्षा ।
प्रव्राजकस्य न तत
सद्वैद्यस्येव दोषोऽपि ॥ ८७ ॥

इत्थ प्रव्रजित सन्
सूत्रोक्तां प्रतिदिन क्रिया कुर्वन् ।
चारित्रेतरसमर्थो
मुनिप्रतस्थापनार्ह स्यात् ॥ ८८ ॥

अधिगतशास्त्रपरिज्ञा-
सूत्रार्थोऽनुक्तवर्जको योग्य ।
पक्व स निशिशुद्ध
नवभिर्भेदै परिहरेच्च ॥ ८९ ॥

अप्राप्तेऽर्थमकथय-
ननभिगतार्थेऽपरीक्षिते यस्तु ।
स्थापयति व्रतभार
प्राप्नोत्याज्ञाविरोधमसौ ॥ ९० ॥

शैक्षस्य भुवस्तिस्र
सप्ताहोरात्रका जघन्याऽत्र ।
षण्मासिक्युत्कृष्टा
मध्यमिका स्याच्चतुर्मासा ॥ ९१ ॥

भूगातस्वाभाविक-
जनुषो दर्दुरकवज्जल च तथा।
व्योमोद्भवस्य पातात्
स्वभावतो मत्स्यवद्धापि ॥ ९८ ॥

आहारादनलोऽपि च
बुद्धिविकारोपलम्भतो व्यक्तम्।
अपर प्रेरिततिर्य-
ग्गतेः सचित्तश्च वायुरपि ॥ ९९ ॥

जन्मजरामृतिजीवन-
रोहणरुग्णौहृदैस्तथाहारात्।
रोगचिकित्सादिभ्यो
नार्य इव सचेतनास्तरव ॥ १०० ॥

त्रसजीवत्व व्यक्तं
तत्पालनतो व्रतानि मूलगुणा
प्राणातिपातविरमण-
मुख्या षट् चरणं तु भूमौ ॥१०१॥

एकेन्द्रियादितापन-
सङ्घट्टनपीडनादिना प्रथमे ।
प्रचलाक्रोधादिभ्यः
सूक्ष्मोऽन्यश्च द्वितीये स्यात् ॥ १०२ ॥

क्रोधानाभोगादे
सधर्मकाद्यमदत्तहरणे च ।
अस्तेये ब्रह्मण्यपि
करकर्मणि गुप्त्यरक्षायाम् ॥ ३ ॥

१ अदिग्धमेतत्, अत्र तु ' चरणात्म ' इति पाठः सम्भवति पर काव्यादर्शेऽदृष्टत्वात् तथैव न्यस्त ।

अतिचार पञ्चमके
सूक्ष्म काकादिरक्षणाज्ज्ञेय ।
कल्पाष्टके ममत्व-
द्रव्यादिग्रहणतश्चान्य' ॥ ४ ॥

ज्ञानाद्यनुपकृतिकृतो
धरणे वा वस्तुनोऽतिरिक्तस्य ।
षष्ठे च चतुर्भङ्गी
दिवागृहीतादि निष्पन्ना ॥ ५ ॥

उदकार्द्रादिपरीक्षां
कुर्यात् कथनोत्तरं च गीतार्थाः ।
परिहरति नोदके वा
योग्यत्वमनीदृशे भजना ॥ ६ ॥

कायोत्सर्गयोगो-
पस्थापनचैत्यवन्दनादिविधौ ।
कृत्वा गुरवो वामे
पार्श्वे सस्थाप्य त ददते ॥ ७ ॥

एकैक त्रीन् वारान्
व्रतमत्र स्थानविषयमिममाहु ।
पट्टमुखवस्त्रकूर्पर-
वामकरानामिकाग्रहणम् ॥ ८ ॥

अपि हस्तिराजदन्तो-
न्नतहस्ताभ्यां रजोहरणधरणम् ।
प्रादक्षिण्य चाशिषि
गुरोरियं स्यात् परीक्षापि ॥ ९ ॥

ईषदवनतभ्रमता-
मभिसरणे वृद्धिरपहृतौ हानिः ।
साधूना द्विविधा दिक्
साध्वीना तिस्र एता स्यु ॥ १० ॥

आचामाम्लादि तप
शक्त्या तत्सत्कृ तु मण्डल्याः ।
उपदेशयेत् परिणत
नो चेद् गुप्तेर्विराधकता ॥ ११ ॥

गुरुगच्छवसतिसज्ञा-
हारोपकरण तपोविचारेषु ।
भावनविहारमुनिवर-
कथासु यतते च परिणामी ॥ १२ ॥

इ[illegible]पो नृपमित्र शिष्य
सेवेत गुरु ततो विनय वृद्धया ।
सद्दर्शनानुरागा-
दपि शुद्धिर्गतिमस्येव ॥ १३ ॥

---

गुरुसेवाभ्यासवतां
शुभानुबन्धो भवे परत्रापि ।
तत्परिवारो गच्छ-
स्तद्वासे निर्जरा विपुला ॥ १४ ॥

---

स्मारणवारणनोदन-
विनयकरणकारणादिनाऽस्याज्य. ।
विधिना तस्य तु विरहे-
च्छाऽथमठच्छात्र तुल्यगुणा ॥१५॥

शिष्य पर्नि[illegible] वा-
प्येक गणो वा न सद्गानि दचे
य तत्र [illegible]न-
चरणगुणास्तेतु सुगतिफलाः ॥ १६ ॥

---

ननु गुरुकुलवासवतां
[illegible] [illegible]मस्ति चेद् सत्यम् ।
[illegible] तदेरक्ष्य या
तद्गुणितया वसति तद्वेतु ॥ १७ ॥

---

सेवन सुद्धमति
सहपरिद्धे सम कुशीलैश्च ।
परिवर्जयाद्वशुद्ध
[illegible] ॥ १८ ॥

इत्थ यतमानोऽपि
स्त्रीरागेणाभिबाध्यते स यदा।
भावयति तदा सम्यक्
विषयस्त्रीसङ्गवैषम्यम् ॥ २५ ॥

मासादिविहारेण च
विवहरेदादिस्तु वक्ति कार्येण।
न्यूनत्वादि विहार-
प्रौव्य त्विह मोहशान्त्यर्थम् ॥ २६ ॥

इत्य च सुज्यतेदो
रोगचिकित्सातिचारवदिहापि ।
रौद्रविपाकेऽपि गति
मतीतविपरीतभावतति ॥ २२ ॥

नालोचनादि मात्र
प्राक्षयादेरपि हि येन तद्भाव ।
स प्रतिकारविपोगम-
मसुखाव न सातिचारमद ॥२३॥

इत्य विचारत स्यात्
सवेगातिशयतश्चरणवृद्धि ।
दुष्णन्यथा प्रवृत्ति
भा ॥ २४ ॥

इत्थ यतमानोऽपि
स्त्रीरागेणाभिबाध्यते स यदा ।
भावयति तदा सम्यक्
विपयस्त्रीसङ्गवैपम्यम् ॥ २५ ॥

मासादिविहारेण च
विवहरेदादिस्तु वक्ति कार्येण ।
न्यूनत्वादि विहार-
ध्रौव्य त्विह मोहशान्त्यर्थम् ॥ २६ ॥

नित्यवसतिरपि परिणत-
गुर्वादीना तु कारणेन स्यात् ।
द्रव्यत एव न भावा-
दागमयतना विशुद्धधियाम् ॥ २७ ॥

भाषा मृषान्यथा तु
प्रवचननिन्दा च शिष्यगुणहानिः।
तीर्थोच्छेदश्चेति
स्वल्पाध्ययनेन योग्यत्वम् ॥२१॥

कालोचितसूत्रार्थे
तस्मात्सुविनिश्चितस्य युक्तोऽय।
श्रवणादेव न यदिय
'सम्मत्यां' सिद्धसेनोक्ति ॥ २२ ॥

" जह जह बहुस्सुओ
सम्मओ अ सीसगणसपरिवुडो अ।
अविणिच्छिओ अ समए
तह तह सिद्धंतपडिणीओ ॥ २३ ॥

दपवादोत्सर्गे विषयवित्सम्यक्
अविषयदेशनया च
स्वपरविनाशी स नियमेन ॥ ३४ ॥

अनुयोगविधिश्चाय
सुतिथौ गुरुरत्रविशेषित्रयायाम् ।
रचितायां कथितायां
पुरत शिष्यो यथा जात ॥ ३५ ॥

उपकरणत उपयुक्त-
स्ततो गुरु प्रत्युपेक्षते विधिना ।
मुखवस्त्रिकां स शिष्य
सशिर काय तथा चापि ॥३६॥

श्री

आवर्त्तद्वादशाभि-
र्वन्दनदानेन भणति शिष्योऽथ ।
सन्दिशत स्वाध्याय
स्वस्था प्रस्थापयाम इति ॥ ३७ ॥

प्रस्थापयेत्यनुमते
प्रस्थापयतो ततश्च गुरु ।
तिष्ठन्निवेदितेऽस्मिन्
प्रस्थापयतोऽनुयोग द्वौ ॥ ३८ ॥

अनुयोग गुरुणाथो
शिष्योऽनुज्ञापयेच्च वन्दित्वा ।
अभिमन्त्र्याक्षान् देवान्
वन्देत गुरुस्ततो विधिना ॥ ३९ ॥

सनमस्कारनन्दी-
माकर्षयति स्थितोऽथ परिपूर्णाम् ।
शिष्यः शृणोति भावा-
न्नन्दीमाकृष्य भणति गुरुः ॥४०॥

अनुयोगमस्य साधो
क्षमाश्रमणहस्ततोऽहमनुजाने ।
पर्यायद्रव्यगुणै-
सोऽनुज्ञातोऽथ वन्दित्वा ॥ ४१ ॥

सन्दिशत किं भणामी-
त्यादि मागवद्वदेदिह विशेष ।
अधिकाशीरन्येषां
धारय सम्यग् प्रवेदय च ॥ ४२ ॥

गुरुरुपविशति कृतात्रि-
प्रदक्षिणे शिष्यके तनूत्सर्गे ।
विहिते चानुज्ञार्थे
स निषद्य गुरु प्रदक्षिणयेत् ॥४३॥

तत उपविष्टस्य गुरु-
स्त्रीन् वारान् स्वान्तिके सुशिष्यस्य ।
कथयति मन्त्रपदानि
स्वपरम्परया गतान्येव ॥ ४४ ॥

दत्ते सुगन्धमुष्टीं-
स्त्रीनक्षाणा प्रवर्द्धमानांश्च ।
तद्ग्राहिणि च शिष्ये
स्वनिषद्याया निवशयति ॥ ४५ ॥

त वन्दतेऽथ स मुनि-
गुरुः स्वशक्त्या स देशनां दत्ते ।
तुल्यगुणदीपनार्थं
नैतदद्दुष्टं द्वयोरपि हि ॥ ४६ ॥

प्रणमन्ति ततो मुनयो
गुरुस्तत स्वासनस्थितस्तस्य ।
कुरुते गुणप्रशसा-
मन्ये तु प्रथममेवाहुः ॥ ४७ ॥

अयमनुयोगी प्राज्ञः
प्रवचनकार्येषु नित्यप्रयुक्तः ।
योग्येभ्यो व्याख्याता
दद्यात्सिद्धान्तविधिनैव ॥ ४८ ॥

मध्यस्था बुद्धियुता
माज्ञा धर्मार्थिनश्च योग्या स्यु
इह मार्जनादिपूर्वं
विषयस्थापना च विधि ॥ ४९ ॥

व्याख्यातसमभावं
श्रोतु परिभाव्य योग्यताभेदम् ।
अपि दृष्टिवादभेदं
निर्व्यूढं वा तत सूत्रम् ॥ ५० ॥

सम्यग्धर्मविशेषो
यत्र कपच्छेदतापपरिशुद्धः ।
कथितस्तन्निर्व्यूढं
वरश्रुतस्तत्परिज्ञादि ॥ ५१ ॥

कल्याणान्यत्र स्यु
पुंसः सम्प्राप्तमोक्षबीजस्य ।
सुरमनुजेशसुखानि
प्रतिपूर्णसुखानुबन्धीनि ॥ ५५ ॥

भूतार्थश्रद्धान
सम्यक्त्वं मोक्षबीजमत्राहुः ॥
भूतार्थवाचकाच्च-
च्छ्रुतान्ताचदाप्तस्य वचन तु ॥ ५६ ॥

ननु तदपि ततो न स्यात्
व्यभिचारस्योपलम्भतो व्यक्तम् ।
यदनन्तश श्रुतास्ति
श्रुते श्रुता द्रव्यलिङ्गवताम् ॥ ५७ ॥

१ श्रुतागम ख।

सत्य तरमाप्तावपि
वीर्यं नोल्लसितमेव जीवस्य ।
हेतुश्च तदुल्लासे
भाय श्रुतमेव को दोष ? ॥ ५८ ॥

असकृदपि साराधे
मात्रैरमाप्तेवेधपरिणाम ।
वेध शुद्धिं च यथा
जात्यमणिर्याति तैरेव ॥ ५९ ॥

अकलितवीर्योल्लास-
स्तया श्रुतादप्यनन्तश माप्तात् ।
लभते वीर्योल्लास
मन्य शुद्धिं च तत एव ॥ ६० ॥

अस्यैव हि स्वभावो
यदतीवेषु श्रतादियोगेषु ।
लभते च.योंल्लासं
भव्य शुद्धिं च वृद्धिं च ॥ ६१ ॥

नैवं स्वभाववाद
स्याद्वादेऽन्तरभस्य दोषाय ।
सहकारिसाचित्र
भव्यस्य च स्वभावोऽत्र ॥ ६२ ॥

तदचित्रत्वे सिद्धे (द्धि)
कालादिभिदा कदापि न घटेत ।
कर्मादिभिरपि तदु-
पक्रमे तच्चित्रतायीजम् ॥ ६३ ॥

नो चेदमव्यजीव-
स्वभावमपि तानि किं न विजयेरन्।
तद्दयापाराभावेऽ
प्यस्मिन्नन्विष्यतां बीजम् ॥ ६४ ॥

तत्रैव तानि किञ्चित्
फलमथ जनयन्ति नापरत्रेति
ननु तेष्वित्र स्वभावो
भिदां व्रजेदाश्रयऽप्येवम् ॥ ६५ ॥

विनिगमका भावादपि
हेतूना मिति फले मिथोऽपेक्षा ।
इत्यमभिमत्यैतत्
'सम्मत्यां' निजगदे सुधिया ॥६६॥

" कालो सहाव णियई
पुव्वकयं पुरिसकारणेगंता ।
मिच्छत्त ते चेव उ
समासओ होंति सम्मत्त ॥ ६७ ॥ "

तदपि न चित्रत्व चे-
दनेकजननैकस्वभावत्वात् ।
क्षणिक समर्थात् स्वफलो-
पनतेरपि च प्रतिव्याप्तेः ॥६८॥

नैवं नामान्तरतः
स्याद्वादोपगमपर्यवसितत्वात् ।
एकान्तस्याघटनात्
विल्कपत कात्स्न्र्यदेशाभ्याम् ॥६९॥

तस्यैव तथा भवने
नो हातु पार्यतेऽन्वयोर्यानाम् ॥
व्यतिरेकोऽपि क्रमिक-
स्वकार्ययोगादितीय दिक् ॥ ७० ॥

स्याद्वादादित्थमय
वीर्योल्लास क्रमात् समासाद्य ।
सम्यक्त्व द्रव्याख्य
भावं चरण च शिवमेति ॥ ७१ ॥

द्रव्याख्य सम्यक्त्व
जिनवचन तत्त्वमिति रुचि परमा ।
भूतार्थबोधशक्त्या
परिणमते भावसम्यक्त्वम् ॥ ७२ ॥

अज्ञातगुणे सम्यक्
या श्रद्धा भवति सुन्दरे रत्ने
हन्त ततोऽनन्तगुणा
विज्ञातगुणे पुनस्तस्मिन् ॥ ७३ ॥

---

प्रशमादिलिङ्गजनकं–
शिवबीजं तेन भावसम्यक्त्वं
श्रुतधर्मस्तद्धेतु
परीक्षणीयस्ततो यत्नात् ॥ ७४ ॥

---

सूक्ष्मोऽस्त्यशेषविषयः
सावद्ये यत्र कर्मणि निषेधः ।
रागादिकुट्टनसहं
ध्यानं च स नाम कषशुद्धः ॥ ७५ ॥

नो कार्या परपीडा
यथाऽत्र मनसा गिरा च वपुषा च।
ध्यातव्य च नितान्त
रागादिविपक्षजाल तु ॥ ७६ ॥

स्थूलो न सर्वविषय
सावद्य यत्र कर्मणि निषेध ।
रागादि कुट्टनसह
न ध्यानाद्यप तदशुद्ध ॥ ७७ ॥

बहुभि पञ्चभिरेका
हिंसाऽत्र यथा मृषाविसवादे ।
ध्यानेन ध्यातव्यम्
तत्त्वमकारादिक चेति ॥ ७८ ॥

यदन्यैरुक्तम्—" अनास्थमतां
शकटमरणैको घात "
तथा—" प्राणी प्राणिज्ञानं
घातकचित्त च तद्गता चेष्टा ।
प्राणैश्च विप्रयोग
पञ्चभिरापद्यते हिंसा ॥"
तथा—" असन्तोऽपि स्वका दोषा ।
पापशुद्ध्यर्थमीरिता ।
न मृषायै विसंवाद-
विरहाचस्य कस्यचित् ॥"
तथा—" ब्रह्माकारोऽत्र निर्देश
अकारो विष्णुरुच्यते ।
महेश्वरो मकारस्तु
त्रयमेकत्र तत्त्वतः॥७९॥" इति

नित्योद्युक्ततया या
संयमयोगेषु विविधभेदेषु।
वृत्तिर्धार्मिकसाधो-
स्तद्वाह्यं स्यादनुष्ठानम् ॥ ८० ॥

---

एतेन विधिनिषेधौ
बाध्येते यत्र नैव नियमेन।
सम्भवत परिशुद्धौ
ब्रुवते तं छेदपरिशुद्धम् ॥ ८१ ॥

---

समितिषु पञ्चसु च यथा
तिसृषु च गुप्तिषु सदाऽप्रमत्तेन।
विधिना यतिना कार्यं
कर्त्तव्यं कायिकाद्यपि हि ॥ ८२ ॥

आपि च प्रमादजनका-
स्त्याज्या वायादय परम्परया ।
मधुकरवृत्त्या भिक्षा
लब्ध्यात्मा पालनीयश्च ॥८३॥

---

य प्रमादयोगात्
सन्मयोगेषु विविधभेदेषु ।
नो धार्मिकप्रवृत्ति-
र्भवते खलु तदनुष्ठानम् ॥८४॥

---

एतेन यत्र बाध्यौ
वर्द्धेते नैव विधिनिषेधौ च ।
छेदेनापरिशुद्ध
त ग्रथ माहुराचार्या. ॥ ८५ ॥

सङ्गीतकादि कार्ये
देवानामुद्यतो यथा नु यते ।
अपि चान्यधर्मिकाणा-
मुच्छेदोऽसभ्यवचन च ॥ ८६ ॥

यदन्यैरुक्तम्—" सङ्गीतकेन देवस्य
प्रतरारणवाद्यत ।
तत्मीत्यर्थमतो यत्न-
स्तत्र कार्यो विशेषत ॥"

तथा—" अन्यधर्मस्थिता मत्वा
असुरा इव विष्णुना ।
उच्छेदनीयास्तेषा हि
वधे दोषो न विद्यते ॥ "

तथा—'ब्रह्मघातकोऽहम्' इत्यादि वचनात्
तद्वेदनीय कर्मक्षय इति ॥

जीवादिभाववादो
दृष्टेष्टाभ्यां न च खलु विरुद्धः ।
तापविशुद्धः सोऽन्यो
द्वाभ्यामपि नैव शुद्धः स्यात् ॥८७॥

इह सदसदादिरूपे
जीवे बन्धादि युज्यते सर्वम् ।
नानीदृशे तु किञ्चित्
वरश्रुत शुद्धमित्थ तत् ॥ ८८ ॥

मुख्योपचाररूप-
स्तवो द्विधा द्रव्यभावतो यत्र ।
वर्ण्यते उचितक्रमत
सा कथितास्तवपरिज्ञेति ॥ ८९ ॥

भावस्तवो यतीना
क्रियाकलाप स्मृतो निरतिचार
जिनभवनविधानादि
द्रव्यस्तव एव विविशुद्धम् ॥ ९० ॥

द्रव्यस्तवभावस्तव-
रूप ह्यन्योन्यसमनुविद्ध तु ।
गृहिणोपि भावयागो
भगवद्गुणरागतो भूयान् ॥ ९१ ॥

द्रव्यस्तवश्च साधो-
रप्यनुमोदनकृती न नास्तीति ।
विहित कायोत्सर्ग
सूत्रे यद्वन्दनाद्यर्थ ॥ ९२ ॥

इत्यादिमन्त्रस्मरणे
न च गतु प्रतिषिद्धमर्हता जातु ।
तस्मात् सोऽनुज्ञातो
योग्यानां गम्यते न्यायात् ॥ ९३ ॥

अनुजानीते नार्हन्
योगं भावविगुणं कदाचिदपि ।
तदनु गुणोऽस्य न पुन-
र्नान्येषां बहुमतो भवति ॥ ९४ ॥

भावस्य योऽपि लेशः
स बहुमतो भगवता गुणज्ञेन ।
द्रव्यस्तवेन न विना
स इत्यसावर्थनस्तादृक् ॥ ९५ ॥

कार्यं सत्वभिलषताऽ-
नन्तरमपि कारणं समभिलषितम्।
आहारजतृप्तिमिवा-
भिवाञ्छता नूनमाहारं ॥ ९६ ॥

जिनभवनकारणाद्यपि
भरतादिनां न रागितं तत्र।
तेषां यथैव कामा
शल्यविषादिभिरुदाहरणे ॥ ९७ ॥

अनुगतमिदमपि तस्मा-
दप्रतिषेधेन तान्निरन्यायात्।
शेषाणामप्येव
सङ्गतमस्यानुमत्यादि ॥ ९८ ॥

यथचतुर्थो निनयो
भणितस्तत्रोपचारितो नथ ।
स हि तौ(त)स्तत्रे निरगान्
न भवेद्द्रव्यस्तवादन्य ॥ ९९ ॥

सूत्रे हि पूजनादि-
रेतत्सम्पादनार्थमुदारः ।
नो चेत्तदार्थस्त
माक्षात्तु न भावस्तवेऽसौ ॥ २०० ॥

साक्षादपि गृहीणा
पुनरयमुचितो भावकारणत्वेन ।
आकर्ण्यते यतीना
कारणमपि देशना चात्र ॥ २०१ ॥

नन्वैव हिंसाऽपि हि
धर्माय न दुष्यतीति सम्प्राप्तम्
एव च वेदविहिता
हिंसाऽनिष्टेति को मोह ॥ २०२ ॥

इह समता पीडाया
परिणामसुखस्य चापि हिंस्यानाम् ।
अपि पापपुण्यजनने
व्यभिचारो वैद्यजाराभ्याम् ॥ २०३ ॥

स्यात्तत्र शुभो भावो
न्वयमितरत्र तुल्यतामेति ।
एकेन्द्रियादिभेदा-
विशेष' कोऽपि विहितविधेः॥२०४॥

एतदपि न मुक्तिसह
वाङ्मात्रस्याप्रयोजकत्वेन ।
संसारमोचकाना-
मपिधर्मं स्यादपरथा तु ॥ २०५ ॥

एकस्य न सम्यक्त्वे
विनिगमनालोकतो विगानाच्च ।
स्तोकस्यापि विगाने
व्यभिचारादेशभेदेन ॥ ६ ॥

अविगानमपि बहूनां
मूढतरभावतो न विनिगमकम् ।
नीरागश्च न कश्चिद्
भवेदसर्वज्ञवादिमते ॥ ७ ॥

म्लेच्छानामप्येव
वाङ्मात्रान्मैत्री दुष्टा न स्यात् ।
द्विजवरमपि घातयता
पुरतो ननु चण्डकातिनाम् ॥ ८ ॥

अन्यतरारूढत्व
सममुभयनाप्यगस्कारत्व च
उत्तानशास्त्रवेदा-
शङ्कापि निवर्तते नेह ॥ ९ ॥

तस्मान्न वचनमात्र
प्रवृत्तिहेतुर्भवेत्प्रधजनानाम् ।
किन्तु तथा दृष्टेष्ट-
विरोधितत्सम्भवद्रूपम् ॥ १० ॥

द्रव्यस्तवादृयथोर्द्वे-
भावापत्कल्पगुणयुतास्तेरान् ।
जिनभवनकारणादे-
रुपकार. पीडयाऽपीर ॥ ११ ॥

---

सर्वत्र सदाभावे
भावापदि भगवतां हि बिम्बानाम् ।
तन्निस्तरणसमर्थं
नियमेनायतनमेतेषाम् ॥ १२ ॥

---

पुरुषोत्तमप्रतिष्ठा
साधुनिवासश्च देशना स्थाने ।
एकैकं मासाप-
विस्तरणगुण हि भव्यानाम् ॥ १३ ॥

इत्थ पृथ्व्यादीना
पीडाकृदपीह सङ्गता हिंसा ।
अन्येषां गुणसाधन-
योगात् मत्यससिद्धात् ॥ २४ ॥

आरम्भवतथासा-
वारम्भान्तरनिवृत्तिमा प्राय ।
इत्थ निदानरहिता
कथिता नि श्रेयसफलाय ॥ २५ ॥

व्यवहारवचनमेत-
न्निश्चयतो नैव बन्धनोपाय ।
मोक्षोपाय कथमपि
परस्परविरुद्धभावेन ॥ १६ ॥

शुद्धेतरपरिणामौ
निश्चयतो मोक्षबन्धनोपायौ ।
अत्याज्य' सन्निधाना
परपरिणामा उदासीना ॥ १७ ॥

सम्यक्त्वचरित्रे यत्
तीर्थकराहारबन्धके तूक्ते ।
नो योगकषायाणां
व्याप्त्या वैशिष्ट्यमात्रेण ॥ १८ ॥

तदिह यदंशे सम्यक्
गुणप्रकर्षो न तेन बन्धोऽस्ति ।
भाविरत्पक्षेनासा–
बविशिष्टो निष्फका हिंसा ॥ १९ ॥

भक्त्या च व्यवहार
सान्निध्यात् स्याद्यथा घृत दहति
इत्थ च कल्पहिंसा
गुणयोगान्मोक्षफलदोक्ता ॥ २० ॥

---

तस्मान्नाधर्मोऽस्यां
वैधज्ञानेन भवति गुणभावात्तु ।
आपत्सु गुणाद्ऽन्या
निर्वाचितो वैदिकी नैवम् ॥ २१ ॥

---

भूत्यादिफलोद्देश-
प्रवृत्तितो मोक्षसाधिका नापि ।
मोक्षफल च सुचरन
शिष्ट स्वर्गादिवचनसमम् ॥ २२ ॥

अग्निर्मामितस्मान्-
मुन्चस्त्वेनस इति श्रुतिरेह ।
अन्धेतमसीत्यादि
स्मृतिरपि सूचयति दुष्टत्वम् ॥ २३ ॥

---

मानाभावात् कल्प्यं
नात्रान्यार्थत्वमपि च बुद्धिमता ।
प्रकृते च (न) प्रवचने
श्रूयन्ते पापवचनानि ॥ २४ ॥

---

अनुपन्यस्यमनिष्टं
परिणामसुखं च हिरण्यानानाम्।
इष्टेष्वविरुद्धार्था-
स्त्वप्रभावो भ्रष्टचक्रभावमयः ॥ २५ ॥

एकेन्द्रियादिभेदोऽ
प्यविशेषसपक्षचया(या)पि स्यात् ।
शूद्रसहस्रेऽपि हते
यश्च मता ब्रह्महत्येति ॥ २६ ॥

यतनातोल्पेयमपि
ध्रुव च सा सर्वधर्मसर्वस्वम् ।
परिणतजलदलशुध्या
सा च महार्थव्ययादत्र ॥ २७ ॥

इत्थ खलु निर्दोष
शिल्पादिविधानमपि जिनेन्द्रस्य ।
दुष्टमपि लेशत मत्
बहुदोषनिवारकत्वेन ॥ २८ ॥

वरबोधिलाभतोऽसौ ।
सर्वोत्तमपुण्यसंयुतो भगवान् ।
एकान्तपरहितरतो
विशुद्धयोगो महासत्त्व. ॥ २९ ॥

यद्वद्गुण प्रधाना
नद् वास्ता यत्तु तथैव दर्शयति ।
तत्तद्रक्षणकर्तु-
र्यथोचितं को भवेद्दोष. ॥ ३० ॥

अशस्तत्र शुभतरो
बहुदोषनिवारणेह विश्वगुरु' ।
नागाग्नेराकर्षण-
दोषेऽपि यथेह शुभयोगः ॥ ३१ ॥

एव निवृत्तिसारा
हिंसेय तत्त्वतस्तु विज्ञेया ।
यतनाविधिशुद्धिमत
पूजादिगतापि च नथैव ॥ ३२ ॥

---

अनुपकृता अपि पूज्या-
श्चिन्तामणिवत्फल प्रयच्छन्ति ।
अधिकनिवृत्तिश्चास्या
भावेनाधिकरणत्यागात् ॥ ३३ ॥

तद्गुणकृदिय हिंसा
सर्वज्ञगिरां च सम्भवद्रूपा ।
निश्चिततदुक्तसमया-
गतात्सुधीसम्प्रदायाच्च ॥ ३४ ॥

देववचनं च नैवं
न पौरुषेय मत यतस्तद्धि ।
इदमत्यन्तविरुद्ध
वचन चापौरुषेयं च ॥ ३५ ॥

क्वचिदपि न श्रुतमुच्चैः
पुरुषव्यापारविरहितं वचनम् ।
गगनेऽपि च नाशङ्का
विलोक्यते दृश्यमर्तृगदा ॥ ३६ ॥

नैवेदं किं वर्णानां
लोके दृष्टं न पौरुषेयत्वम् ।
अपि तत्प्रकाशशक्ते-
रनिश्चयान्निश्चयो न ततः ॥ ३७ ॥

नेयन्नृमात्रगम्या
तदतिशयो बहुमतो न युष्माकम् ।
लौकिकवाग्भ्यो दृष्ट
कथञ्चिदत्रापि वैधर्म्यम् ॥ ३८ ॥

समयाभिधा न च स्व-
प्रकाशकत्व विदार्थनियम न ।
इन्दीवरे हि दीप
शोणतमसत् प्रकाशयति ॥ ३९ ॥

मूलच्छेदाद्बोधो
नवा सुधि सम्प्रदायतोऽप्यन ।
अन्धेनान्धानयन-
मायो गुरुशिष्यबोधो यत् ॥ ४० ॥

अस्माकं च न दोष
सर्वज्ञे वचनपूर्वकेऽपि मति ।
बीजाङ्कुर वदनादे-
र्नियमादर्थाश्रिताद् भावात् ॥ ४१ ॥

हिंसादोषादि न तत्
सर्वत्रास्मिन्नसम्भवद्रूपे ।
नहि रत्नगुणोऽरत्ने
नास्थाने तन्नय स्थाप्य ॥ ४२ ॥

भूतवध खलु वेदो
निषिध्य त नियमयन् फलोद्देशात् ।
फलभावेऽप्युत्सर्गं
त्यागे दोष निवेदयति ॥ ४३ ॥

यद्वैयके निषिद्धो
दाहो व्याधिसपार्थमपि विहित ।
ओयनिपेषोक्त नो
दु खकरत्व मतिक्षिपति ॥ ४४ ॥

किमिह मसक्तकथया
भावद्रव्यस्तवावुचितनीत्या ।
अन्योन्यसमनुविद्धौ
भरतो नियमेन मन्तव्यौ । ४५ ॥

द्रव्यस्तवोऽल्पशक्ते-
र्भावस्तव एव भ गनि गुरुशक्ते ।
पल्शतभरासमर्थो
नहि वोढु पर्वत महते ॥ ४६ ॥

१ यद्वैतभेदन, इत्यय ।

यदत्रचरित्रयोग्यो
बाह्यत्यागरूपेण भवति शुरः ।
कण्टकनतो धर्मे
चतुर्विधे हेतुफलभावात् ॥ ४७ ॥

यः सद्धर्ममनित्य
दानं दत्ते न शक्तिमान् लुब्ध ।
दुर्धरतरं कवचं
बिभर्ति शीलव्रतं वशी ॥ ४८ ॥

नाशीत शुद्धमथ
कर्तुं सहते न मोक्षपत्नम् ।
स्वयं वा तपोऽप्यकुर्वन्
भावयति सुभावनामाक्षम् ॥४९॥

द्रव्यस्तवोऽत्र दान
शेषा भावस्तवा सुपरिशुद्धा ।
सद्भिस्तेय सूत्रे
विस्तरत स्तवपरिज्ञा तु ॥ ५० ॥

एवंविधमन्यदपि
ज्ञानपरिज्ञादि पाचयति धीर ।
ज्ञात्वा स्वशिष्यसम्पद-
मुधुक्त प्रवचनहितेऽसौ ॥ ५१ ॥

अस्यैव परानुज्ञा
क्रियते गुणिन कदाचिदन्यस्य ।
वदपति सहृदयमुख्याद्
यस्माज्जिनशासनश्लाघा ॥ ५२ ॥

सूत्रार्थे निष्णात
प्रियदृढधर्मोऽनुवर्त्तनाकुशलः ।
गम्भीरो लब्धिनिधि
कृतकरणशुद्धजातिकुल ॥ ५३ ॥

प्रवचनदृढानुराग
सोपग्रहसङ्ग्रह॰ स्थिरप्रकृति ।
पुरुषोत्तम इव गच्छ-
स्वामी भणितो जिनवरेन्द्रै ॥ ५४ ॥

गीतार्था कृतकरणा
कुलजा परिणामिनी च गम्भीरा ।
चिरदीक्षिता च वृद्धा
प्रवर्तिनी सयती भणिता ॥ ५५ ॥

व्यूढो गणधरशब्दो
गौतमप्रमुखैः स्वयं पुरुषसिंहैः ।
यस्तमपात्रे धत्ते
जानानोऽसौ महापापः ॥ ५६ ॥

कालोचितगुणरहिते
स्वस्मिन् यः स्थापितं च तं शब्दं
अनुपालयति न सम्यग्
विशुद्धभावः स्वसक्त्यापि ॥ ५७ ॥
युग्मम्

शब्दः प्रवर्तिनीति
व्यूढो यश्चार्यचन्दनाद्याभिः ।
यस्तमपात्रे धत्ते
जानानोऽसौ महापापः ॥ ५८ ॥

कालोचितगुणरहिता
या स्वस्या स्थापित च तं शब्दं ।
अनुपालयति न सम्यग्
विशुद्धभावा स्वशक्त्यापि ॥५९॥ युग्मम्

पददाने योग्यानां
गुरुतरगुणमलनया परित्यजता ।
शिष्या भवन्ति नियमा–
दाज्ञाकोपेन चात्मापि ॥ ६० ॥

तस्मात्तीर्थकराज्ञा–
राधननिरतो यथोक्तगुणपात्रे ।
गीतार्थो निश्चित्य
प्रवर्त्तिनीगणिपदे दत्ते ॥ ६१ ॥

दीक्षावयसो प्राप्तो
धृतिमान् पिण्डैषणादिविज्ञाता ।
पीठादिधर मोक्त
स्वलब्धियोग्योऽनुप्राप्तिपर ॥६२॥

अयमपि सार्द्धं गुरुणा
पृथगथ गुरुदत्तयोग्यपरिवार ।
विहरति तदभावे वा
विधिनैव समाप्तकल्पेन ॥ ६३ ॥

जातो जातश्च मतो
गीतार्थेतरकृतो द्विधा कल्प ।
पञ्चकतदूनभावात्
समाप्ततद्व्यत्ययविभिन्न' ॥६४॥

ऋतुबद्धे ऽपीह च
सप्तसमासस्तदूनकस्त्विनरः ।
असमाप्ता जानाना
भवति हि नाभाव्यमोघेन ॥ ६५ ॥

भवति समाप्ते कल्पे
कृतेऽपि चान्योन्यसङ्गतानां हि ।
गीतार्थसमेताना-
मुभयेषां तद् यथासमयम् ॥६६॥

सयत्यपि गुणपङ्क्त्या
साभ्यधिका भवति शेषसान्वीभ्य ।
श्रुतदीक्षादिपरिणता
स्वलब्धियोग्या भवेदेषा ॥ ६७ ॥

आसां नहि स्वलब्धि
सर्वं यद् गुरुपरीक्षित भाप ।
भवति च लघुत्वमाहु,
केचिदितीद न युक्तिसहम् ॥६८॥

कालाचरणाभ्यां यत्
स्वलब्धिरुचिते लघुत्वमपि विप्रे
जातसमाप्तविभाषा
तासामपि सूनतां मृग्या ॥ ६९ ॥

अत्रानुज्ञार्थविधौ
शिष्य सस्थाप्य वामपार्श्वे तम् ।
देयान् वन्देत गुरु-
र्वन्दित्वा भणति शिष्योऽथ ॥७

अनुजानीत दिगादिक-
मिच्छाकारेण यूयमस्माकम् ।
इच्छाम इति तदर्थो-
त्सर्ग कुरुते गुरुरयोक्त्वा ॥ ७१ ॥

विधिनानुज्ञानन्दि-
माकर्णयति सशृणोति शिष्यश्च ।
भणति पुनर्वन्दित्वा
प्रागुक्तं भावितस्वान्त ॥ ७२ ॥

साधारस्य दिगादि
क्षमाश्रमणहस्ततोऽहमनुजाने ।
भणति गुरुर्वन्दित्वा
शिष्योऽथ भणत्यशठचित्तः ॥७३॥

सन्दिशत किं भणामि
गुरु प्रवेदय तथेति वन्दित्वा ।
कृत्वा तद्वन्दित्वा
प्रवेदित भणति युष्माकम् ॥७४॥

सन्दिशत च साधूनां
प्रवेदयामि प्रवेदयेति गुरु ।
श्रुते ततश्च शिष्यो
वन्दित्वाऽऽकृष्यमङ्गलकम् ॥ ७५ ॥

कुरुते प्रदक्षिणां प्रद-
गुरो स दत्त्वोपयोगवान् वासान् ।
देवादीनां शीर्षे
प्रक्षिपन् भणति ॥७६॥

वन्दित्वा गुरुगुणैस्त्रीन्
वारानुपविशेद्द्विधायैवम् ।
शेषं सामायिकवत्
दिगनुज्ञार्थमिन्त्वहोत्सर्गः ॥७७॥

उपविशति गुरुसमीपे
ततश्च शिष्य परे तु वन्दन्ते ।
स गुरुरप्यनुशास्ति
द्वयोः मद्दत्ते सबोधफलाम् ॥ ७८ ॥

उत्तमपदमुत्तमजन-
सेवितमिदमुत्तमोत्क्रमासाद्य ।
धन्य पात्र गत्वा
लभते सुखमुत्तम कश्चित् ॥ ७९ ॥

त्वमसि च तादृग् गुणवान्
भिषग्वर प्राणिनां भवार्त्तानाम् ।
तत्र शरण मपन्ना
मोचयितव्यास्त्वया भव्या ॥८०॥

युष्माभिरपि च नाय
मोक्तव्यो भववने महागहने ।
सिद्धिपुरसार्थवाह
क्षणमपि नित्य तु ससेव्य ॥८१॥

आज्ञाकोपोपरथा
स्यादतिदुःख मदस्तदेतस्य ।
निर्भर्त्सितैरपि पदौ
त्याज्यो कुलवधूज्ञातात् ॥८२॥

व्रतिनीनामप्येवं
गुरुरनुशास्ति करोति दर्शयति ।
पूर्वोत्तमसाध्वीनां
गुणान् पुनश्चन्दनाद्यानाम् ॥८३॥
भणति स्वलब्धिरूपमपि
भाग्जाता गुरुपरीक्षितैव तव ।
लब्धिवस्त्रादीनां
निर्दोषा पारतन्त्र्यवत ॥ ८४ ॥
सम्मति सूत्रायचो
जातोऽसि त्वमिति वस्तुनि प्रकृते ।
सम्यक् प्रवर्तितव्यं
बहुगुणलब्धिर्यथा भवति ॥८५॥
उत्थाय सपरिवार
त्रिर्गुरुमथ भावत प्रदक्षिणयेत् ।
अथ पालयति स गच्छ
शिष्यान्निष्पादयन्नीत्या ॥ ८६ ॥

ईड्गणिविहितगण'
व्यवहाराचरणमेव भव्यानाम् ।
दर्शयति मोक्षमार्गं
दीप इव गृहस्थित वस्तु ॥ ८७ ॥

भरते भूतेति शिथिलै
कलिदोषादगलितसुविहितविहारे ।
स्थेय गुणार्थमगुणे-
ऽप्यग्रहिलग्रहिलनृपनीत्या ॥ ८८ ॥

अगुणादपि गुणवृद्धि
र्यदि भवति द्रव्यचन्दनादिभ्यः ।
तदवकरादपि रत्नो-
इत्याहुराचार्या. ॥ ८९ ॥

हीनेऽपि गुणांशे तु
भावो भावेन वन्दन न्याय्यम् ।
इत्थ मार्गाभ्युदय
कारणमिह कल्पभाष्योक्तम् ॥९०॥

---

निरुपक्रमकर्मवशा-
च्छित्य मागकदचदृष्टिरपि ।
चरणकरणे त्वशुद्धे
शुद्ध मार्गं प्ररूपयतु ॥ ९१ ॥

---

दर्शनशास्त्राभ्यासा-
द्धीनोऽपि पथप्रभावनोद्युक्त ।
यल्लभते फलमतुल
न तत् क्रियामात्रमग्नमति ॥ ९२ ॥

विफलक्रियाभिमाना-
दज्ञानाच्चरणशुद्ध्यभावेन ।
इदमित्थमेव गदित
यत् ' सम्मत्या ' महामतिना ॥ ९३ ॥

---

चरणकरणप्पहाणा
ससमयपरसमयमुक्कवावारा ।
चरणकरणस्स सार
णिच्छयसुद्ध न याणंति ॥ ९४ ॥

---

पर्यायद्रव्यगुणै-
रात्मज्ञानमिह कथ्यते बोध ।
श्रद्धादर्शन-
च चारित्रम् ॥ ९५ ॥

इत्थं रत्नत्रयतो
प्राप्तेस्मिन्निर्विकल्पभावनिधौ ।
समभावात् सामायिक-
पदमहति सुपरिशुद्धा ॥ ९६ ॥
पवनादिव कल्लोला-
परपरिणामा विकल्पता पुंसः ।
स्थिरनिर्विकल्पवृत्ति
स्तिमितोदधिसन्निभे त्वस्मिन् ॥ ९७ ॥
आगन्तुकाद्विकल्पा-
न्निमित्त प्रसरता स्वभावेन ।
कर्तृत्वाद्यभिमानात्
कर्माणूना स संसरति ॥ ९८ ॥
स्नेहालिङ्गितवपुषो
रेणुभिराश्लिष्यते यथा गात्रम् ।
रागद्वेषासमते
कर्मस्कन्धैस्तथा श्लेष ॥ ९९ ॥

पश्यन्नाटकमात्मा
तदनादिद्रव्यभारकर्मकृतम् ।
अन्तर्दशा स्वभावा-
न्न चलति भगवानुदासीन ॥२००॥

अस्यां निमीलितायां-
मपि च व्यवहारधीनिमीलायाम् ।
अयमीदृगेव न मृगो
भवति मृगपतिः प्रसुप्तोऽपि ॥२०१॥

कुरुते नहि परभावा-
न्न कारयत्यपि च नानुजानीते ।
परिणामाना स्वेषां
कर्ता च भोक्ता च ॥२॥

परभावकर्तृचेतो-
वाक्कायाभेदमध्यवस्यन्त ।
दधते पराङ्मुखत्व
स्वभावज्ञापमथाभूमे ॥ ३ ॥

---

नहि देहो न मनो
न चापि वाणी न कारण तेपाम् ।
ज्ञायकभावस्त्वह-
मिति नोधो भूमि स्वभावस्य ॥ ४ ॥

---

पुरुषत्वमेव मित्र
तव किं बहिरीहसे पर मित्रम् ।
उच्चालयिन रे स्व
दूरालयिक च जानीहि ॥ ५ ॥

इत्यादिभिरुपदेशै
सूत्रोक्तैर्मोक्षमार्गदुरपरतम् ।
मननात्मकस्य सिद्ध्य-
त्यनात्मभेदप्रबोधस्य ॥ ६ ॥

परमात्मा भिन्न स्यात्
परभेदज्ञानपरिणतो जीव ।
वैषम्यविनिर्मुक्त-
स्वरूपमात्रप्रकाशेन ॥ ७ ॥

क्षणमपि कर्मविलासो
परमे परमेष्ठिभावलब्धमति ।
घनसमयेऽपि रविरिव
प्रकाशते मेघनिर्मुक्त ॥ ८ ॥

आत्मस्वभावदर्शी
स्वैरं कर्मोपनीतफलैरपि
लिप्येत न पापभरै-
रवशिष्टमुपप्लवं पश्यन् ॥ ९ ॥
मायोदकं यथावद्
पश्यन् यात्येव तेन मार्गेण ।
पश्यन्नलीकरूपान्
भोगान्नुल्लङ्घयत्यरम् ॥ १० ॥
तांस्तत्वेन तु जानन्
मग्नो भावेन मोहजं चाले ।
उभयभ्रष्टः स्पष्टं
निरन्तरं खेदमनुभवति ॥ ११ ॥
अन्तःकरणध्यान-
प्रतिबन्धकघटनार्थमुद्युक्तः ।
भोगैरपि लिप्तमति-
र्न भवत्याक्षेपकज्ञानात् ॥ १२ ॥

उभयपदाव्यभिचारो
भणित सम्यक्त्वमौनयो सूत्रे।
अस्यामेव दशायां
घटते सम्यग्दृश सोऽयम् ॥ १३ ॥

सयमजन्यविशुद्धि-
स्तदानपायेति निश्चयस्थित्या।
फलविषये व्यभिचारो
न सयमस्थानविरहेऽपि ॥ १४ ॥

तस्मादात्मज्ञाने
कार्य सतत मुमुक्षुणाभ्यास.।
किमपरशास्त्रविकल्पै-
र्जातिमायै. कुतर्कौघै ॥ १५ ॥

आत्मज्ञानविरहिते
शास्त्रे शस्त्रे च कोऽपि न विशेषः ।
भ्राम्यन्ति मूढलोका
केवलमाकारभेदेन ॥ १६ ॥

आत्मज्ञानग्रन्था
पन्थानो ये तु मोक्षनगरस्य ।
गुरुचरगुणगुरुचरण--
प्रसादतस्तेऽनुसर्तव्या ॥ १७ ॥

एनां गुरोरधीत्य
श्रद्धत्ते य इह मार्गपरिशुद्धिम्
परमानन्द लभते
स 'यशोविजय' श्रिया पूर्णम् ॥१८॥

श्रीविजयदेवसूरी
जयिनि श्रीविजयसिंहसूरौ याम्‌ ।
प्राप्ते साम्राज्यभृति
श्रीमद्विजयप्रभाचार्ये ॥ १९ ॥

रुचिर सतीर्थ्यभाव
दधतां श्रीजीतविजयविबुधानाम्‌
श्रीनयविजयबुधाना
शिशुनाऽय विरचितो ग्रन्थ ॥ २०॥

इति श्री महोपा याय श्रीमद्‌ यशोविजय
गणिना कृता मार्गपरिशुद्धि सम्पूर्णा॥